## हलसूकरयोः पुवः। (१८३/३१६४)

[1]पू इति पूङ्पूञोः [2]सामान्येन ग्रहणम्। [3]अस्माद् धातोः करणे कारके ष्ट्रन् प्रत्ययो भवति, [4]तच्चेत् करणं हलसूकरयोरवयवो भवति। हलस्य पोत्रम्। सूकरस्य पोत्रम्। मुखम् उच्यते[5] ॥

## अर्तिलूधूसूखनसहचर इत्रः। (१८४/३१६५)

'[6]ऋ गतौ' (धा. पा. १०९९), 'लूञ् छेदने' (धा. पा. १४८४), 'धू विधूनने' (धा. पा. १३९९), 'षू प्रेरणे' (धा. पा. १४०९), 'खनु अवदारणे' (धा. पा. ८७९), 'षह मर्षणे' (धा. पा. ८५३), 'चर [7]गतिभक्षणयोः' (धा. पा. ५५९), [8]एतेभ्यो धातुभ्यः करणे [9]कारके इत्रः प्रत्ययो भवति। अरित्रम्। लवित्रम्। धवित्रम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम् ॥

## पुवः सञ्ज्ञायाम्। (१८५/३१६६)

पूङ्पूञोः (धा. पा. ९६७, १४८३) सामान्येन ग्रहणम्। पवतेर्धातोः[10] करणे कारके इत्रप्रत्ययो भवति, समुदायेन चेत् सञ्ज्ञा गम्यते। [11]दर्भः पवित्रम्। [12]बर्हिष्पवित्रम् ॥

## कर्तरि चर्षिदेवतयोः। (१८६/३१६७)

पुवः इति वर्तते। [13]पुवः करणे कर्तरि च[14] इत्रप्रत्ययो भवति। ऋषिदेवतयोः [15]यथासङ्ख्यं सम्बन्धः। ऋषौ करणे, देवतायां कर्तरि। पूयते अनेन इति पवित्रोऽयमृषिः। देवतायाम् – 'अग्निः पवित्रं स मा पुनातु। वायुः सोमः सूर्य इन्द्रः [16]पवित्रं ते मा पुनन्तु' (नि. ५. ५) ॥

## ञीतः क्तः। (१८७/३०८८)

[17]ञि इद् यस्यासौ ञीत्। [18]ञीतो धातोः वर्तमाने[19]ऽर्थे क्तप्रत्ययो भवति। भूते निष्ठा विहिता, वर्तमाने न प्राप्नोति [20]इति विधीयते। 'ञिमिदा [21]स्नेहने' (धा. पा. १२४४) – मिन्नः। [22]ञिक्ष्विदा – क्ष्विण्णः। ञिधृषा – धृष्टः ॥

---

1. पू इति नास्ति ह. 2. अविशेषेण ब. क. ह. 3. पुवः अ. क. फ, पवतेः ब. 4. चेत् नास्ति फ. 5. इत्यर्थः इत्यधिकम् ब. क. 6. अर्त्यादिभ्यः धातुभ्यः फ. 7. गत्यर्थः अ. ब. क. ड, चरत्यर्थः ह. 8. इत्येतेभ्यः ब. 9. कारके नास्ति ह. 10. संज्ञायां विषये इत्यधिकम् फ. 11. दर्भपवित्रम् फ. ह. 12. बर्हिपवित्रम् ड. 13. पुवः धातोः अ. ब. क. 14. कारके इत्यधिकम् ड. 15. यथायोगं ह. 16. पवित्रः ह. 17. ञिशब्दः क. ड. ह. 18. तस्मात् इत्यधिकम् क. 19. अर्थे नास्ति अ. ब. 20. इत्यनेन फ. ह. ड. 21. स्नेहने नास्ति अ. ह. 22. उदाहरणमिदं नास्ति ग.